# श्रीमद् भागवत रसिक कुटुंब

## मधुराष्टकम्

अधरं मधुरं(वँ) वदनं मधुरं(न्),
नयनं मधुरं हसितं मधुरम् ।
हृदयं मधुरं(ङ्) गमनं मधुरं
मधुराधिपतेरखिलं मधुरम् ॥1॥

वचनं मधुरं(ञ्) चरितं मधुरं(वँ)
वसनं मधुरं(वँ) वलितं मधुरम् ।
चलितं मधुरं भ्रमितं मधुरं
मधुराधिपतेरखिलं मधुरम् ॥2॥

वेणुर्मधुरो रेणुर्मधुरः(फ्),
पाणिर्मधुरः(फ्) पादौ मधुरौ ।
नृत्यं मधुरं सख्यं मधुरं,
मधुराधिपतेरखिलं मधुरम् ॥ 3॥

गीतं मधुरं पीतं मधुरं
भुक्तं मधुरं सुप्तं मधुरम् ।

रूपं मधुरं(न्) तिलकं मधुरं,
मधुराधिपतेरखिलं मधुरम् ॥ 4॥

करणं मधुरं(न्) तरणं मधुरं,
हरणं मधुरं रमणं मधुरम् ।
वमितं मधुरं शमितं मधुरं,
मधुराधिपतेरखिलं मधुरम् ॥ 5॥

गुञ्जा मधुरा माला मधुरा,
यमुना मधुरा वीची मधुरा ।
सलिलं मधुरं(ङ्) कमलं मधुरं,
मधुराधिपतेरखिलं मधुरम् ॥ 6॥

गोपी मधुरा लीला मधुरा,
युक्तं मधुरं मुक्तं मधुरम् ।
दृष्टं मधुरं शिष्टं मधुरं
मधुराधिपतेरखिलं मधुरम् ॥ 7॥

गोपा मधुरा गावो मधुरा,
यष्टिर्मधुरा सृष्टिर्मधुरा ।
दलितं मधुरं फलितं मधुरं
मधुराधिपतेरखिलं मधुरम् ॥ 8॥

।श्रीवल्लभाचार्य कृत।।